हलधृग्विष्णुमीशानं, बलरामं कृपानिधिम् ॥ ३३ ॥
श्रीवल्लभं कृपानाथं जगन्मोहनमच्युतम्।
मत्स्यकूर्मवराहादि-रूपधारिणमव्ययम् ॥ ३४ ॥

वासुदेवं जगद्योनिमनादिनिधनं हरिम् ।
गोविन्दं गोपतिं विष्णुं, गोपीजनमनोहरम् ॥ ३५ ॥
गोगोपालपरीवारं, गोपकन्यासमावृतम् ।
विद्युत्पुञ्जप्रतीकाशं, रामं कृष्णं जगन्मयम् ॥ ३६ ॥
गोगोपिकासमाकीर्णं, वेणुवादनतत्परम् ।
कामरूपं कलावन्तं, कामिनीकामदं विभुम् ॥ ३७ ॥
मन्मथं मथुरानाथं, माधवं मकरध्वजम् ।
श्रीधरं श्रीकरं श्रीशं, श्रीनिवासं परात्परम् ॥ ३८ ॥
भूतेशं भूपतिं भद्रं, विभूतिं भूतिभूषणम् ।
सर्वदुःखहरं वीरं, दुष्टदानववैरिणम् ॥ ३९ ॥
श्रीनृसिंहं महाबाहुं, महान्तं दीप्ततेजसम् ।
* चिदानन्दमयं नित्यं, प्रणवं ज्योतिरूपिणम् । ४० ॥
आदित्यमण्डलगतं, निश्चितार्थस्वरूपिणम् ।
भक्तप्रियं पद्मनेत्रं, भक्तानामीप्सितप्रदम् ॥ ४१ ॥
कौशल्येयं कलामूर्तिं काकुत्स्थं कमलाप्रियम् ।
सिंहासने सनमासीनं, नित्यव्रतमकल्मषम् ॥ ४२ ॥
विश्वामित्रप्रियं दान्तं, स्वदारनियतव्रतम् ।
यज्ञेशं यज्ञपुरुषं, यज्ञपालनतत्परम् ॥ ४३ ॥

---

* श्लोक ३१ से ३९ तक श्रीरामजी के अन्य अवतारों का वर्णन तत्वतः अभेद मान कर किया गया है ।

सत्यसन्धं जितक्रोधं, शरणागतवत्सलम् ।
सर्वक्लेशापहरणं, विभीषणवरप्रदम् ॥ ४४ ॥
दशग्रीवहरं रौद्रं, केशवं केशिमर्दनम् ।
बालिप्रमथनं वीरं, सुग्रीवेप्सितराज्यदम् ॥ ४५ ॥
नरवानरदेवैश्च, सेवितं हनुमत्प्रियम् ।
शुद्धं सूक्ष्मं परं शान्तं, तारकं ब्रह्मरूपिणम् ॥ ४६ ॥
सर्वभूतात्मभूतस्थं, सर्वाधारं सनातनम् ।
सर्वकारणकर्तारं, निदानं प्रकृतेः परम् ॥ ४७ ॥
निरामयं निराभासं, निरवद्यं निरञ्जनम् ।
नित्यानन्दं निराकारमद्वैतं तमसः परम् ॥ ४८ ॥
परात्परतरं तत्वं, सत्यानन्दं चिदात्मकम् ।
मनसा शिरसा नित्यं, प्रणमामि रघूत्तमम् ॥ ४९ ॥
सूर्यमण्डलमध्यस्थं, रामं सीतासमन्वितम् ।
नमामि पुण्डरीकाक्षममेयं गुरुतत्परम् ॥ ५० ॥
नमोऽस्तु वासुदेवाय, ज्योतिषां पतये नमः ।
नमोऽस्तु रामदेवाय, जगदानन्दरूपिणे ॥ ५१ ॥
नमो वेदांत निष्ठाय, योगिने ब्रह्मवादिने ।
मायामयनिरस्ताय, प्रपन्नजनसेविने ॥ ५२ ॥
वन्दामहे महेशानं, चंदकोदंडखंडनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥ ५३ ॥
उत्फुल्लामलकोमलोत्पलदलश्यामाय रामाय ते ।

कामाय प्रमदामनोहरगुणग्रामाय रामात्मने ।
योगारूढ़मुनीन्द्रमानसमरोहंसाय संसारवि-
ध्वंसाय स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ॥ ५४ ॥

भवोद्भवं वेदविदांवरिष्ठमादित्यचन्द्रानलसुप्रभावम् ।
सर्वात्मकं सर्वगतस्वरूपं, नमामि रामं तमसः परस्तात् ॥ ५५
निरन्जनं निष्प्रतिमं निरीहं, निराश्रयं निष्कलमप्रपञ्चम् ।
नित्यं ध्रुवं निर्विषयस्वरूपं, निरन्तरं राममहं भजामि ॥५६।
भवाब्धिपोतं भरताग्रजं तं, भक्तप्रियं भानुकुलप्रदीपम् ।
भूतित्रिनाथं भुवनाधिपत्यं, भजामि रामं भवरोगवैद्यम् ।५७
सर्वाधिपत्यं समरेगभीरं सत्यं चिदानन्दमयस्वरूपम् ।
सत्यं शिवं शान्तिमयं शरण्यं, सनातनं राममहं भजामि।५८
कार्यक्रियाकारणमप्रमेयं, कविं पुराणां कमलायताक्षम् ।
कुमारवेद्यं करुणामयं तं, कल्पद्रुमं राममहं भजामि ॥५९॥
त्रैलोक्यनाथं सरसीरुहाक्षं, दयानिधिं द्वन्द्वविनाशहेतुम् ।
महाबलं वेदनिधिं सुरेशं, सनातनं राममहं भजामि ॥६०॥
वेदान्तवेद्यं कविमोशितारमनादिमध्यान्तमचिन्त्यमाद्यम् ।
अगोचरं निर्मलमेकरूपं, नमामि रामं तमसः परस्तात् ॥६१
अशेषवेदात्मकमादिसंज्ञमजं हरिं विष्णुमनन्तमाद्यम् ।
अपारसंवित्सुखमेकरूपं, परात्परं राममहं मजामि ॥ ६२ ॥
तत्वस्वरूपं पुरुषं पुराणं, स्वतेजसा पूरितविश्वमेकम् ।
राजाधिराजं रविमण्डलस्थं, विश्वेश्वरं राममहं भजामि ।६३

लोकाभिरामं रघुबंशनाथं, हरिं चिदानन्दमयं मुकुन्दम् ।
अशेष विद्याधिपतिं कवीन्द्रं,नमामि रामं तमसः परस्तात् ।६४
योगीन्द्रसंघैश्च सुसेव्यामानं, नारायणं निर्मलमादिदेवम् ।
नतोऽस्मि नित्यं जगदेकनाथमादित्यवर्णं तमसःपरस्तात्६५
विभूतिदं विश्वसृजं बिराजं राजेन्द्रमीशं रघुवंशनाथम् ।
अचिन्त्यमव्यक्तमनन्तमूर्तिं,ज्योतिर्मयं राममहं भजामि॥६६
अशेषसंसारबिकारहीनमादित्यगं पूर्णसुखाभिरामम् ।
समस्तसाक्षिं तमसः परस्तात्,नारायणं विष्णुमहं भजाभि६७
मुनीन्द्रगुह्यं परिपूर्णकामं, कलानिधिं कल्मषनाशहेतुम् ।
परात्परं यत्परमं पवित्रं, नमामि रामं महतो महान्तम् ॥६८

ब्रह्मा बिष्णुश्च रुद्रश्च, देवेन्द्रो देवतास्तथा ।
आदित्यादिग्रहाश्चैव, त्वमेव रघुनन्दन ६९ ॥
तपसा ऋषयः सिद्धाः, साध्याश्च मरुतस्तथा ।
विप्रा वेदास्तथा यज्ञाः पुराणाः धर्मसंहिताः ॥७०॥
वर्णाश्रमास्तथा धर्माः, वर्णधर्मास्तथैव च ।
यक्षराक्षसगन्धर्वाः, दिक्पाला दिग्गजादिभिः ॥७१॥
सनकादिमुनिश्रेष्ठास्त्वमेव रघुपुङ्गव ।
वसवोऽष्टौ त्रयः कालाः रुद्रा एकादश स्मृताः ॥७२ ॥
तारका दशदिक् चैव, त्वमेव रघुनन्दन ।
सप्तद्वीपाः समुद्राश्च, नागा नद्यस्तथाद्रुमाः ॥ ७३॥
स्थावरा जङ्गमाश्चैव, त्वमेव रघुनायक ।

देवतिर्यङ्मनुष्याणां, दानवानां तथैव च ॥ ७४॥
माता पिता तथा भ्राता, त्वमेव रघुवल्लभ ।
सर्वेषां त्वं परंब्रह्म, त्वन्मयं सर्वमेवहि ।७५॥
त्वमक्षरं परंज्योतिस्त्वमेव पुरुषोत्तम ।
त्वमेव तारकंब्रह्म, त्वत्तोऽन्यन्नैव किञ्चन ॥७६॥
शातं सर्वगतं सूक्ष्मं परंब्रह्म सनातनम् ।
राजीवलोचनं रामं प्रणमामि जगत्पतिम् ॥ ७७ ॥

व्यास उवाच—

ततः प्रसन्नः श्री रामः प्रोवाच मुनि पुङ्गवम् ।
तुष्टो ऽस्मि मुनिशार्दूल वृणीष्व वरमुत्तमम् ॥७८॥

नारद उवाच—

यदि तुष्टोऽसि सर्वज्ञ, श्री राम करुणानिधे ।
त्वन्मूर्तिदर्शनेनैव कृतार्थोऽहं च सर्वदा ॥ ६६॥
धन्योऽहं कृतकृत्योऽहं पुण्योहं पुरुषोत्तम ।
अद्य मे सफलं जन्म जीवतं सफलं च मे ॥ ८० ॥
अद्य मे सफलं ज्ञानमद्य मे सफलं तपः ।
अद्य मे सफलं जन्म, त्वत्पादाम्भोजदर्शनात् ॥ ८१ ॥
अद्य मे सफलं सर्वं त्वन्नामस्मरणं तथा ।
त्वत्पादाम्भोरुहद्वन्द्वसद्भक्तिं देहि राघव ॥ ८२ ॥
ततः परमसम्प्रीतः स रामः प्राह नारदम् ।
मुनिवर्य्य महाभाग, मुने त्विष्टं ददामि ते ।

यस्त्वया चेप्सितं सर्वं मनसा तद्भविष्यति ॥ ८३ ॥

नारद उवाच—वरं न याचे रघुनाथ युष्मत्-
पादाब्ज भक्तिः सततं ममास्तु ॥
इदं प्रियं नाथ वरं प्रयाचे ।
पुनः पुनस्त्वामिदमेव याचे ॥ ८४ ॥
अद्वैतममलं ज्ञानं त्वन्नामस्मरणं तथा ।

व्यास उवाच—

इत्येवमीडितो रामः प्रादात् तस्मै वरोत्तमम् । ८५ ॥
वीरो रामो महातेजाः सच्चिदानन्दविग्रहः ॥
अन्तर्दधे जगन्नाथः पुरतस्तस्य राघवः ॥ ८६ ॥
इति श्रीरघुनाथस्य, स्तवराजमनुत्तमम् ।
सर्वसौभाग्यसम्पत्तिदायकं मुक्तिदं शुभम् ॥ ८७ ॥
कथितं ब्रह्मपुत्रेण, वेदानां सारमुत्तमम् ।
गुह्याद्गुह्यतमं दिव्यं, तवस्नेहात्प्रकीर्तितम् ॥ ८८ ॥
यः पठेच्छृणुयाद्वापि, त्रिसन्ध्यं श्रद्धयान्वितः ।
ब्रह्महत्यादि पापानि, तत्समानि बहूनि च ॥ ८९ ॥
स्वर्णस्तेयं सुरापानं, गुरुतल्पयुतानि च ।
गोवधाद्युपपापानि, ह्यनृतात् सम्भवानिच ॥ ९० ॥
सर्वैः प्रमुच्यते पापैः, कल्पायुतशतोद्भवैः ।
मानसं वाचिकं पापं, कर्मणा समुपार्जितम् ॥ ९१ ॥
श्रीरामस्मरणेनैव, तत्क्षणान्नश्यति ध्रुवम् ।

इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते ॥ ९२ ॥
रामः सत्यं परं ब्रह्म, रामात् किञ्चिन्न विद्यते ।
तस्माद्रामस्यरूपोऽयं सत्यं सत्यमिदं जगत् ॥ ९३ ॥

सूत उवाच—

श्री रामचन्द्र रघुपुङ्गव राजवर्य,
राजेन्द्र राम रघुनायक राघवेश ।
राजाधिराज रघुनन्दन रामभद्र,
दासोऽहमद्य भवतः शरणागतोऽस्मि ॥ ९४ ॥

वैदेही सहितं सुरद्रुमतले हेमैर्महा मण्डपे,
मध्ये पुष्पकमासने मणिमये वीरासने संस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्वं मुनीद्रैः परं ।
व्याख्यातं भरतादिभिः परवृतं रामं भजे श्यामलम् ९५

रामं रत्नकिरीटकुन्डलयुतं केयूरहारान्वितम् ।
सीतालंकृतवामभागममलं सिहासनस्थं विभुम् ॥९६

सकलगुणनिधानं योगिभिः स्तूयमानं, भुजविजितविमानं राक्षसेन्द्रादिमानम् । महितबृषभयानं सीतयाशोभमानं, स्मरहृदयविमानं, ब्रह्म रामाभिधानम् ॥ ९७ ॥

रघुवर ! तवमूर्तिर्मामके मानसाब्जे, नरकगतिहरं तेनामधेयं मुखे मे । अनिशमतुलभक्त्या मस्तकं त्वत्पदाब्जं, भवजलनिधिमग्नं रक्ष मामार्त बन्धो ॥ ९८ ॥

रामरत्नमहं बन्दे, चित्रकूटपतिं हरिम् ।
कौशल्याशुक्ति संभूतं, जानकीकण्ठभूषणम् ॥ ९९ ॥

इति श्रीसनत्कुमारसंहितायां नारदोक्तं श्रीरामस्तवराजस्तोत्रम् ।

श्रीजानकीस्तवराजः

तां ध्यायेस्तवराजेन प्रोक्तरूपां परात्पराम् ।
आह्लादिनीं हरेः कांचिच्छक्तिं सात्वतसेविताम् ॥ १ ॥

श्रीश्रुतिरुवाच—

कीदृशः स्तवराजोऽयं केनप्रोक्तः सुरेश्वरः ।
कथ्यतां कृपयादेव जानकीरूपबोधकः ॥ २ ॥

श्रीसंकर्षण उवाच—

ब्रवीमिस्तवराज ते श्रीशिवेनप्रभाषितम् ।
श्रुतं श्रीवक्त्रतोदिव्यं पावनानां च पावनम् ॥ ३ ॥
चकाराराधनं तस्य मंत्रराजेन भक्तितः ।
कदाचिच्छ्रीशिवो रूपं ज्ञातुमिच्छुर्हरेः परम् ॥ ४ ॥
दिव्यवर्षशतं वेदविधिना विधिवेदिना ।
जजाप परमं जाप्यं रहस्येस्थितचेतसा ॥ ५ ॥
प्रसन्नोऽभूत् तदादेवः श्रीरामः करुणाकरः ।
मंत्राराध्येन रूपेण भजनीयः सतांप्रभुः ॥ ६ ॥

श्रीराम उवाच—

द्रष्टुमिच्छसि यद्रूपं मदीयं भावनास्पदम् ।
आह्लादिनीं परां शक्तिं स्तूयाः सान्वतसम्मताम् ॥७॥
तदाराध्यस्तदारामस्तदधीनस्तयाविना ।
तिष्ठामि न क्षणं शम्भो जीवनं परमं मम ॥ ८ ॥

इत्युक्त्वादेवदेवेशो वशीकरणमात्मनः ।
पश्यतस्तस्यरूपं स्वमन्तर्द्धानं दधौ प्रभुः ॥ ९ ॥
श्रुत्वारूपं तदाशम्भुस्तस्याः श्रीहरिवक्त्रतः ।
अचिन्तयत् समाधाय मनः कारणमात्मनः ॥ १० ॥
अस्फुरत् कृपयातस्य रूपं तस्याः परात्परम् ।
दुर्निरीक्ष्यं दुराराध्यं सात्वतां हृदयंगमम् ॥ ११ ॥
आश्रयं सर्वलोकानां ध्येयं योगिविदां तथा ।
आराध्यं मुनिमुख्यानां सेव्यं संयमिनां सताम् ॥१२॥
दृष्ट्वाऽऽश्चर्यमयं सर्वं रूपं तस्याः सुरेश्वरः ।
तुष्टावजानकीं भक्त्या मूर्तिमन्तीं प्रभाविनीम् ॥१३॥*

श्रीशिव उवाच —

वन्दे विदेहतनयापदपुण्डरीकं,
कैशोरसौरभसमाहृतयोगिचित्तम् ।

---

* श्लोक १ से १३ तक का शारांश—

किसी समय श्रीजानकी स्तवराज के सम्बन्ध में श्रुति के पूंछने पर श्रीसंकर्षणजी ने बताया कि एक बार श्रीरामजी का साक्षात् करने के लिये शंकरजी ने देवताओं के सौ वर्ष तक वेद विधिसे मंत्रराज-षडक्षरश्रीराममंत्र का अनुष्ठान करके श्रीरामजी की आज्ञा प्राप्त किया कि मेरा साक्षात् करने के लिये मेरी परमाह्लादिनी शक्ति श्रीसीताजी का स्तवन करो। तब शंकरजी ध्यान में देखकर श्रीसीताजी की स्तुति करने लगे।

हन्तुं त्रितापमनिशं मुनिहंस सेव्यं
सन्मानसालिपरिपीतपरागपुञ्जम् ॥ १ ॥

जे निज कोमलताई सुगंध से योगिन के चित चोरि लये हैं।
तीनिहु ताप विनाशन को मुनिहंस निरंतर सेइ रहे हैं॥
सन्त सुमानस भृंग पराग पिये जिनके सब तौर छके हैं।
ते मिथिलेश लली पद कंज दोऊ प्रणमो अनुराग भरे हैं॥

पादस्य यावकरसेन तलं सुरक्तं,
सौभाग्यभाजनमिदं हि परं जनानाम्।
युक्तीकृतं सुभजतां तव देवि नित्यं,
दत्ताश्रयं सुमनसां मनसानुरागम् ॥ २ ॥

सुन्दर लाल महावर से जनभाग सुभाजन के भरवा हैं।
देवि दयावश ह्वै नितही निजदासन को अपनो करवा हैं॥
ब्रह्म हरीश सुरेशन के मन रंजन को अपनो वरवा हैं।
रंजित राग सुरागिन के नवनेह मयी सियके तरवा हैं॥

पादांगुलीनखरुचिस्तव देवि ! रम्या
योगीन्द्रवृन्दमनसा विशदा विभाव्या।
त्रैतापक्लान्त्युपशमाय शशांककान्ति-
र्दोषेण किं समुपयाति तुलां युता सा ॥ ३ ॥

पंकज पायन को अंगुलीनख ज्योति लली सु लसै तव नीकी।
कान्तिमयी कमनीय मनोहर योगिन के अवलंबन जीकी॥
ताप तिहूँ जनखेद विनाशनको न तुलै शशि चाँदनि फीकी।
दूषणता युत मन्द मयंक सदा नख ज्योति अदूषित सीकी॥

मञ्जीरधीरनिनदं कलहन्सकाली,
हासाय सा भवति भावयति त्वदीयम् ।
किञ्चापरं रसिकमौलिमनोनियन्तुं,
दृष्टं मया परमकौशलमत्र तस्या ॥४॥

राम प्रिया पद भूषण की रव का वरनों महिमा मति थोरी ।
पंक्ति लजी कलहंसन की सियजू तुव नूपुर की धुनि सोरी ॥
सुन्दर मन्द गँभीर मनोहर कौशलता तेहि मैंहूँ लखोरी ।
प्रीतम श्रीरघुनन्दन के मन मोहन को जनु मंत्र पढ़ोरी ॥

सिद्धीशबुद्धिवररंजनगूढ़गुल्फौ,
पादारविन्दयुगलौ जनतापवर्गौ ।
विन्दन्ति ते त्रिभुवनेश्वरि ! भावसिद्धिं
ध्यायान्ति ये निखिलसौभगभानुभाजौ ॥५॥

ग्रन्थि छिपी जिन पायन में तव नायक के मनमोद प्रदायक ।
दायक मोद महा जनके युगला वनिता रविभा उपजायक ॥
ध्यायक जे नित पायन के जलजायक से सुषमा सरसायक ।
लायक लोक तिहूँ सिय स्वामिनि ते युगभाव परारस दायक ॥

हेमाभिवर्द्धितविभूषणभूषितं ते,
त्रैलोक्यतेज इव मञ्जुलपुञ्जभूतम् ।
भाविस्म सुन्दरि ! पदं सरसीरुहाभं,
भीताऽभयप्रदमनन्तमनोऽभिधेयम् ॥ ६ ॥

हे सिय ! रावर पाद सरोरुह हेमविभूषण भूषित भ्राजे ।
भ्राजे मनो तिहुंलोक को तेज समस्त मनोहरता कर साजे ॥

गाजे सदा पियमानसमें जिन चिन्तन से भवभीति सुभाजे।
लाजे गरूर गँवाय मनो मम आय लगो नितपायन छाजे ॥
चक्राभहारिसुनितम्बयुगं भवत्या,
ध्येयं सुधीभिरनिशं रशनाभिषक्तम्।
ध्यानास्पदं रघुपतेर्मनसो मुनीनां,
भावैकगम्यममरेशनतांघ्रिपद्मे ॥ ७ ॥

चक्र से गोल नितंब लसैं कटि किंकिणि राजत हैं अति नीके।
पीके हिये विलसैं नितही रसरागिन के अवलम्बन जीके ॥
जीके स्वभाव बिलासक हैं मुनिवृन्दन से रसराज थलीके।
लीके रहे अमेरशन के बिनवैं नित ही पद जे शुभ सीके ॥
कौशेयवस्त्रपरिणद्धमलंकृतं ते,
कार्तस्वराश्मनिमणिप्रवरप्रवेकैः ।
रत्नोत्तमै रसनया ग्रहकान्तिमद्भि-
र्भास्वन्ति निर्मिततया स्वधियन्तिमध्यम् ॥ ८॥

सुन्दर स्वच्छ महामनि से ग्रहकान्तिमयी रसना चटकीली।
सो विलसै औ लसैसुषमा सियजू कटिभाग महासुख सीली ॥
मानिक हेम सु हीरन से लहँगा से लसी पिय चित्तकसीली।
प्रेम से जे जन चिन्तत हैं तिनके हियमाँझ सदा सु बसीली ॥
अश्वत्थपत्रनिभमम्ब ! धियोदरं ते,
भाव्यं भवाब्धितरि ! केवल कालनाशे।
भूयो न भावि जननीजठरेनिवास-
स्तेषां मनो धरणिजेऽत्र सुलग्नमासीत् ॥ ९॥

पीपर पात समान सोहावन भावन बुद्धि सियाकर पेट है।
केवल काल नशाय महाभव सिन्धु उतारन को सरिनेक है॥
भूमिसुता तेहि में जिनके मन लागि रहे करिनेम सुटेक है।
फेरि नहीं जननी जठरे तिन आवन है यह लीक अमेट है॥

नाभीह्रदं हरिमनः करिणः कृशांशो
पुष्टिप्रदं प्रचलितत्रिवलीतरंगम्।
राजीसुशैवलनिभं भ्रमिभूतरोम्णां
शान्त्यैतव त्रितपतामतिभावयामः॥ १०॥

नाभिगँभीर सरोवर रावर सोहत है त्रिवलीन तरंग से।
रोम की पंक्ति सेवारसे राजत बीचि लसे लघुलोम कंदव से॥
राम सुमान सुखी न गजेन्द्र भयो अतिपीन नहाय उमंग से।
तीनिहु ताप विनाशन हेतु भये हमहूँ अब आय सुसंग से॥

नीलाभकञ्चुकिमणीन्द्रसमूहनिष्कै-
र्बद्धोजजुग्ममतितुंगमलंकृतं ते।
हारैर्मनोहरतरैस्तरुणि! क्षितीजे!
सौंदर्यबारिनिधिबारितरङ्गसंगम्॥११॥

भूमिसुता नवला सिय जू अति तुंग उरोजउभै तव सोहै।
हार मनोहर मोतिन के मनिबृन्द सजे सरसै सरिको है॥
कञ्चुकि नील सुरंग मयी सुसजी जिनपै पिय चित्त ठगो है।
सुन्दरता के पयोनिधि हैं उपमा न लहैं जिनके सुहियो है॥

बाहू मृणालमदखण्डनपंडितौ ते,
भीताऽभयप्रदवदान्यतमौ जनानाम्।

रुक्मादांकितविटंकितमुद्रिकौ तौ,
हैरण्यकंकणधृतौ वलयौ भजामः ॥ १२॥

बाहु मृणाल छटा मद खण्डनको क्षमहैं भवभीति नशावन।
कंकन हेममयी अँगुठी अँगुलीन विभूषनते छवि छावन॥
भूषन और अनेक खचे मनि से सरसैं सबभाँति सुहावन।
दीननको प्रतिपाल उदार हैं हौं हूँ भजौं सियमातु के पावन॥

कण्ठं कपोततरुणीगलकान्तिमोषं
भूषैरनेकविधभूषितमम्ब तुभ्यम्॥
ध्यायेम मानसविशुद्धकृते कृपालो!
योगीन्द्रभावितपदे शमदे शरण्ये॥ १३॥

मातु शरण्य सिया सुखदायक योगिन पूजित पाद कृपालो।
रावर कण्ठ विभूषित है बहु भूषन ते सुषमा सरियालो॥
काम कबूतर की तरुनी गलकान्ति छटा छवि छीनन वालो।
मानस शुद्धिके हेतु सदा तोंहि ध्यावत हौं न परौं जेहि जालो॥

वक्त्रेन्दुमिन्दुचयखण्डितमण्डितांशुं,
खण्डांशपंडितमनः परिदंडताशम्।
सन्मानसाब्जमुदितद्युतिदं वरेण्यं,
रामाश्चितारकचकोरमहं भजे ते॥१४॥

कोटिन चन्द्रप्रभाछवि हारक है मुखचन्द्र लली सुविभासक।
ताप विनाशक रागिन के अनुमानिन के मनमध्य प्रकाशक॥
सन्त सुमानस कंजन को मुदमोद मयी स्वप्रभा दरसायक।
रामसुनैन चकोर भये तेहि मैं हूँ भजौं सब भाँति विलासक॥

ताम्बूलरागपरिरंजित दन्तपंक्तिः
प्रद्योतिताधरमधः कृत बिम्बरागम्।
ईषत्स्मितद्युतिकटाक्षविकाशिताशं,
वक्त्रं परेशनयनास्पदमाभजेते १५॥

पानके रंग से रंजित दंतन की वरपंक्ति विराजति जामे।
ताकी छटा अधराधर भासित बिम्बस्वराग लजायललामे॥
मन्द हँसी तिरछी अवलोकनि से दिशवृन्द प्रकाशित तामें।
राम सुनैनन को घरहै मुख रावर को भजिहौं तजि का मैं॥

नासाग्रमौक्तिकफलं फलदं परेशे,
ध्यायन्ति ये च निजजाड्य विनाशहेतोः।
त्रैलोक्यनिर्मलपदं सुखदं त्वदीयं,
स्वेच्छाभिकांक्षिण इदं बहुशोरसज्ञा॥ १६॥

रावर नासिक में सिय जू मुकुताफल सुन्दर लोल लसो है।
रामस्वरूप परा रसदायक भायक लोक तिहूं सुखदो है॥
ध्यावत जे सुरसज्ञ इन्है अपनी जड़ता विनशावन को है।
ते धनि धन्य महारस भाविक उज्ज्वलता अभिलाष कियोहै॥

ज्ञानं निरंजनमिदं विवदन्ति ये ते
मुह्यन्ति सूरिनिवहास्तरुणीकटाक्षैः।
नालोकयन्ति नितरां तव देवि! तावद्
दीर्घायुषाक्षियुगमञ्जनरञ्जितं ते॥ १७॥

नारि अपांग विलासन से सुविमोहित हैं जे महा अभिमानी।
ते जो बदैं बहु ज्ञान अकाम चिरायुषता में महा अपमानी॥

अंजन रंजित रावर के युग नैनन को न लखैं ते अजानी ॥
दम्पति रूप परारस स्वादक जेते लखैं नितही जगरानी ॥

भ्रूवल्लरी विलसितं जगदाहुरीशे !
व्यासादयो मुनिवरास्तुत एव नित्यम् ।
नाशाय तस्य तरुणीतिलके त्वदीया,
पाशीकृता हरिमनोमृगबन्धनाय ॥ १८ ॥

हे परमेश्वरि जानकि जू तवभौंह लता से भये जगजानी ।
व्यास शुकादि महामुनिवृन्द बखानत हैं यह बात प्रमानी ॥
फेरि नशैं सब भौंह के फेरत नारि शिरोमणि श्री महरानी ।
राम मनोमृग बन्धन को यह भौंह सुपास पसारि सयानी ॥

भालं विशालमतिसौभगभाजनं ते,
सिन्दूरबिन्दुरुचिरद्युतिदीप्तिमन्तम् ।
पिण्डीकृतः किमुत राग इतीव तस्मिन्,
प्रद्योतिते जननि ! जागतजन्मभाजाम् ॥१९॥

सेंदुर विन्दु से राजतहैं तव भाल विशाल सुभाग को भाजन ।
रागिन के अनुरागहिं को जनु पिंड बनाय लली किये धारन ॥
सो सरसै दरसै सुषमा द्युतिमन्त महारसराज बढ़ावन ।
प्रेम कृतज्ञ महा करुणारस पूरित मातु ! सु शील लखावन ॥

आदर्शबर्तुलकपोलविलोललोलं,
कर्णावतंसयुगलं जनजाड्यनाशम् ।
सूर्यादिकान्तिहरमाश्रयमोजसान्ते,
तीव्रं धिया धरणिजे स्वधियन्ति धीराः । २०॥

आरसि से द्युति गोल कपोलमें लोल दोऊ श्रुतिभूषण सीके।
प्रेमिन के जड़ताहर हैं अरु ज्योतिन के अवलम्बन जी के॥
भानु से आदि महाग्रह मंडल की सब ज्योति हरैं जगती के।
भूमिसुता श्रुतिभूषण को अति ध्यावत धीर विषैरस भीके॥

कालो विभेति जगतामतिभक्तकस्ते,
जैवातृको भवदसीमगुणो यतोऽसौ।
सर्वातिबल्लभतया भजनीयरूपे,
मन्यामहे हरिरिति श्रुतिभूषसारम्॥ २१॥

काल करालमहा जगभक्तक से अतिभीत मयंक पियूषी।
आयलगे सिय कानन में श्रुति भूषन ह्वै सब भाँति अदूषी॥
ताते भयो जगको यह बल्लभ हे भजनीय महारसपूषी।
मातु सिये! तोंहि काल डरै यह जानि निशंक रहे नितभूषी॥

सीमन्तमम्ब! तव सुन्दरतातिसीमं,
मुक्ताविभूषितमलं समभागभाजम्।
निःसीमतापदकृते यतयो यतन्ति,
जानीमहे महितबन्दितसीममूर्ते॥ २२॥

सुन्दरता कर सीम सिया सिर केस समूहन की छविभारी।
भ्राजत है सब तौर बराबरि मोतिन से सुषमा अति न्यारी॥
मातु सियापद पावन को ऋषि योग समाधिन सों उरधारी।
पूजन बन्दनसीम की मूरति जानत हैं हमहूं सिय प्यारी॥

कालाहिभीतिभजतामहिभोगभिन्ना,
पायात्परेश्वरि सतामवती सदा नः।

एणीदृशस्तव विशालतरानुवेणी,
दर्भाग्रभागसदृशी सुदृशां त्रिलोक्याः ॥ २३ ॥

तीनिहुँ लोक सुनारिन में मृगनैनि सिये तव बेणि सुहाई।
नागिनिसी कुश अग्र समान सी है सु बिशालछटा छबिछाई॥
काल भुजंगम से भयभीतन को प्रतिपाल महासुखदाई।
सो हमरो प्रतिपाल करौ परमेश्वरि पीठ लसी सुखदाई॥

माटी सुसूक्ष्मतरतातिगतातिनीला,
सौवर्णसूत्रकलिता कृपयाऽऽवृता ते।
भर्तुः स्वरूपमनुभावयतां जनानां,
प्रीत्यै करोषि परदेवि यदापिधानम् ॥ २४ ॥

साड़ी सिया अति सूक्ष्म नील लसी तव गात्र प्रभादरसाई।
हेमके सूत्रन से कलभूषित हे परदेवि कृपा अधिकाई॥
आनँद हेतु सुरागिन के उर राखत रामस्वरूप छिपाई।
ताहि कृपा रंग से रंगि के मम सारी समेत रहौ उरछाई॥

पारे गिरां गुणनिधे! श्रुतयोबदन्ति,
रूपं त्वदीयमपरं मनसोऽप्यगम्यम्।
साक्षात् कथं सरसिजाक्षि! भवेद्दते ते,
बुद्धौ कृपामनु कृशोदरि मा दृशां तत् ॥२५॥

हे गुणसिन्धु सिया सरसीरुहलोचनि सूक्ष्म पेट परेसे।
मानस से सु अगम्यमहा तवरूप बखानत वेदरुसेसे॥
बानी न जानि सकै जेहिं को तेहिं को केहिभाँति बखानहुँ लेसे।
ऐसो स्वरूप बिनाकरुनातव आइ बसै मम मानस कैसे॥

किं चित्रमत्र जननि ! प्रभयाप्रकाश्यं,
विश्वं वदन्ति मुनयस्तव देवि ! देवाः ।
जाताश्रयस्त्रिभुवनैर्गुणतोऽभिबन्ध-
स्त्राणादिकर्म विभवं परमस्य यस्याः ॥२६॥

देव मुनीश्वर बृन्द कहैं यह विश्व प्रकाशित है तव शान से ।
सो न व्यलीक कही कछु वे सब सत्य कही यह बात प्रमानसे ॥
आपके आश्रित जो जनहैं जगपालन को सु समर्थ सुजानसे ।
ठौर तिहूं जगबन्दित होत हैं मातु तुम्हार परत्व महान से ॥

वेदास्तवाम्ब विवदन्ति निजस्वरूपं,
नित्यानुभूतिभवभावपराः परेशैः ।
निर्णेतुमद्य यतयस्तपसा यतन्ते,
बोधाय पादसरसीरुहयुग्मभृंगाः ॥ २७ ॥

ज्ञान के हेतु बड़े मुनि योगिन्ह पाद सरोरुह की मधुपाई ।
सेइ चहैं सियरूप विबेचन कोटिन योग तपैं मनलाई ॥
ईश्वर जोव महाप्रकृती के प्रबोधक शब्दन कै बलपाई ।
तीनिहु से सु परे तवरूपको गाय थकीं श्रुति पार न पाई ॥

जातं त्वदेव नितरां जगतां निदानं,
मन्यामहे तदिदमम्ब ! कृतं श्रुतीनाम् ।
सर्वं यतः खलु विचेष्टितमाशु शक्तेः,
कार्यं हि कारण गुणानवलम्ब विद्यात् ॥२८॥

मानत हौं बहु विश्व निदान महान जन्यौ जननी तव अङ्ग से ।
यह प्रशंसित विश्व समस्त भयो तेहिते यह बात अभंग से ॥

जाते परे स्वर शक्ति से चेतन विश्व को मानत है श्रुति बृंदसे।
कारण के गुण को बल पाइ के कारज को लखिलेत उमंग से॥
जानीमहे जननि ! ते नयनारविन्द-

स्योन्मीलनेऽजनि जगत् क्षय तन्निमीलात्।
वैषम्यशून्यसमतां समुपागते यत्,
स्यादस्य पालनमसंशयमस्य नूनम् ॥ २६ ॥

जानत हौं जननी तव नैन के खोलन में भये विश्व अपारे।
प्रतिपालन होत सबै ब्रह्माण्डन को तुँ जबै दृग सौंह निहारे॥
फेरि बिलात न देरि लगै जब मूंदति नैन सिया सरकारे।
यों परिपालन सर्ग विनाश अयास बिना सिय नैन निहारे॥

ज्ञातं त्वदीयमपरं चरितं विशालं,
भावं भवे ननु निजे प्रकटीकरोषि।
प्रेम्णैव तैः प्रथमतः परमानुभावं,
भाव्यं पदाब्जमनिशं स्वजनैरतस्ते ॥ ३० ॥

औरहु एक चरित्र विशाल लखी हमने सियजू तव भारी।
आपन रूप प्रकाशविषे प्रगटावतिहौदृढ़भाव सुखारी॥
याही ते सन्त सुरागिन ने अति प्रेम समेत कृपा तव भारी।
भाव प्रबोधक पाँव सरोरुह को प्रथमैं निज मानसधारी॥

येषामदः परमवस्तु च तज्जनानां,
प्रद्योतते जनकजाचरणारविन्दम्।
सर्वं समीक्ष्य इह कर्ममनोवचोभि-
ब्रह्म स्वरूपमतिदुर्लभतानुसेव्यम् ॥३१॥

सन्त सुजान सनेहिन ने सुनि ब्रह्मस्वरूप महासुख सारे।
ताही के हेतु किये श्रमपुंज भले बच मानस काय सँवारे॥
पायो जबै तेहि कोरस हीन फिरे दुखमानि सनेह सँभारे।
ब्रह्म शिवालय औ सुखमालय पौरुषमय तव पाँय सुधारे॥

किं दुर्लभं चरणपंकजसेवया ते,
पूर्णा रमन्तिरमणीयतया त्रिलोक्याम्।
वस्तुप्रकाशविशदं हृदये त्वदीयं,
तेषामहो किमुत साधनकोटियत्नैः॥ ३२॥

दासभये तव पाद सरोरुह सेय मनोरथ पुंजन पूरे।
कौनसी बस्तु अहै तिहुं लोक में जो न लहै सबभाँति हजूरे॥
ताप विनाशक स्वच्छ महा पद कंज दोऊ जिनके उर जूरे।
साधन कोटि उपाय कदम्ब नहीं चहिये तिनको कछु रूरे॥

धन्यास्त एव तव देवि! पदारविन्द-
स्यन्दायमानमकरन्दमहर्निशं ये।
भृंगायमानमनसो नितरां भजन्ते,
भावावबोधनिपुणाः परदेवतायाः॥ ३३॥

हे परमेश्वरि देवि सिया परदेवन देव प्रताप सुपुंगै।
रावर के पद पंकज द्वौ मकन्दर पगे जिनके मन भृगैं॥
राग सुभाव सुहेतु निरन्तर ते जन धन्य महारस चुगैं।
ज्ञान महारस भाव प्रपूजक सिन्धुभरे निरबात तरंगैं॥

पादाब्जरागपरिरंजितचित्तभृंगो,
येषां समीक्ष इह जातमिदं स्वरूपम्।

तेषां न किं प्रवदते परितो बरिष्ठं,
साध्यं भवेदिह परत्र न किञ्चिदन्यत् ॥ ३४ ॥

रावर पाद सरोरुह राग रँगे जिनके चित भृंग सयाने।
राग रँगे जिन रूप विलोकि कि यों बरनै तिनसों सुखमाने॥
श्री मिथिलेशलली पदकंज पराग विषे चितलाय लोभाने।
साधन साध्य सु उत्तम वस्तु दोऊ दिशिमें तिनभूलि न जाने॥

चुम्बन्ति चिद्घनमहो मकरन्दमस्याः,
देवैर्मुनीन्द्रनिचयैरतिदुर्लभं ते।
पादाब्जयोरतिविकाशविलासबोधः-
स्यादेव देवि! तवकान्तनिजस्वरूपे ॥ ३५ ॥

प्रेम सुभक्ति प्रदायनि रावर रंग रँगे पदकंज सुगंधी।
देव मुनीश्वर वृन्दन को सु अगम्य महारस चेतनसंधी॥
जे जन राग समेत निरन्तर चुम्बत हैं तेहि को मन बंधी।
ते तवकान्त स्वरूप विषे शुभज्ञान प्रकाश लहैं सनबंधी॥

यावन्न ते सरसिजद्युतिहारिपादे!
न स्याद्रतिस्तरुनवांकुरखंडिताशे।
तावत् कथं तरुणिमौलिमणे! जनानां,
ज्ञानं दृढं भवति भामिनि! रामरूपे ॥३६॥

मैथिली के जबलौं पद कंज में पीत सरोरुह की द्युति हारी।
कंजकली सी लसी अँगुली जिनमें छबिछाय रही अतिभारी॥
नारिशिरोमणि भामिनि सीय नहीं रति है जिनकी सुखकारी।
राम स्वरूप को ज्ञान महा तबलौं न लहैं करिसाधन भारी॥

साक्षात् तपो व्रतयमैर्नियमैः समीहेत्,
कर्तुं कृपामृतमिह प्रसभं स्वरूपम्।
नाथस्य ते श्रुतिवचो विषयंकथं स्यान्-
मूढ़ो वृथोत्सृजति देवि सुखान्यमूनि ॥३७॥

योग समाधि तपोव्रत नेम से रावर की करुणामृत हीने।
रामस्वरूप चहैं परतच्छ हठी जिन कोटिन साधन कीने॥
ते न लहैं कबहूँ परतच्छ भ्रमैं जगमें अति दीन मलीने।
प्रेम गली सुखपुञ्ज थली तिन्ह नाहक छाँड़त है रस खीने॥

योगाधिरूढ़मुनयो हरि पाद पद्मे,
ध्यायन्ति ये चरणपंकजयुग्ममन्तः।
वाञ्छन्ति विघ्नशतशोऽप्यनिवार्यमाणां,
भक्तिं भवाब्धितरणाय कृपापयोधे ॥ ३८ ॥

जे मुनि योग समाधि चढ़े रघुनन्दन के पद पंकज लाई।
तेऊ तहाँ सिय पाद सरोरुह ध्यावत हैं परमानँद पाई॥
कोटिन विघ्न निवारन को सुसमर्थ परा रस भक्ति लोभाई।
संसृति सागर के तरिबे कहँ जानकि मातु कृपा अधिकाई॥

चार्वङ्गि! ते चरणचारणबन्दिसंगं,
मह्यं विदेहतनये परिदेहि नान्यत्।
याचे वरं वरविदां वरदे भवत्या,
येनामुना तव धवे मम रंजनास्यात्॥ ३९॥

चारु सु अंगिनि हे बरदे बरदानिन की बयदेहि महीजे।
मातु तेरे पदकंज सनेहिन सेवक संग सदा मोहि दीजै॥

औरन याँचत हौं तुमसों बरदानि बिनै हमरी लखि लीजै।
जाते बढ़ै हमरो अनुराग सदा तव प्रीतम में रस भीजै॥

याचेऽहमम्ब ! रघुनन्दनमूर्तिभावं,
साद्धं त्वयाऽतिदृढ़मंजलिना विशेषम्।
त्वं देहि वेत् वरदे मुनिसंघमुख्या,
मन्यन्तिबल्लभतरां स्वपतेर्भवन्तीम्॥ ४॥

मातु सिया बरदानिन को बरदमयिनि ! याँचत हौं करजोरी।
श्री रघुनन्दन मूरति में दृढ़भाव अनन्य परारस बोरी॥
देहु यही 'रसराजलता' बिनवै, जनि स्वामिनि मोहि तजोरी।
मानत हैं मुनि बृन्द सदा तुमको, अपने पति प्राण बसोरी॥

श्री संकर्षण उवाचः—

एवं स्तुत्वा परं रूपं जानक्या जाड्य नाशनम्।
उपारराम शान्तात्मा योगीश्वरः सदाशिवः॥ १॥
निरीक्ष्य तन्मुखाम्भोजं भावयन् रूपमद्भुतम्।
कांक्ष्यंस्तस्याः परां भक्ति पादपंकजयोर्दृढ़ाम्॥ २॥
उवाच तं वरारोहा जानकी भक्तवत्सला।
एवमस्तु महादेव यत्त्वयोक्तं च नान्यथा॥ ३॥
अन्यत्ते कथितं ब्रूहि दास्यामि देवदुर्लभम्।
सत्यान्मयिकृपोन्मुख्यान्न किंचित्तस्य दुर्लभम्॥ ४॥
प्रसन्नवदनां दृष्ट्वा सोऽपि देवशिरोमणिः।
ययाचे वरमात्मीयं रहस्यं भावबोधकः॥ ५॥

प्रादात्तस्मै वदान्या सा यद्यन्मनसि कांक्षितम्।
वरं वरेश्वरी साक्षात् पुनः प्रोवाच सा हि तम्। ६॥
अयं पवित्रमौलिर्मे स्तवराजस्त्वया शिव।
प्रकाशितोऽतिगोप्योऽपि मत्प्रसादात् सुरोत्तम॥ ७॥
यः पठेदिममग्रे मे पूजाकाले प्रयत्नतः।
तस्येहामुत्र किंचिन्न वस्तु स्याद् दृगगोचरम्॥ ८॥
धनं धान्यं यशः पुत्रानैश्वर्यमतिमानुषम्।
प्राप्येहामोदते भूयो मत्पदं तद् व्रजेत् सह॥ ९॥
यद्यल्लोकोत्तरं वस्तु त्रिषुलोकेषु दृश्यते।
सर्वं तदस्य पाठेन प्राप्नुयाद् भुविमानवः॥ १०॥
इदं मे परमैकान्तं रहस्यं सुरसत्तम।
न प्रकाश्यं त्वया शंभो शठाय भावद्वेषिणे॥ ११॥
भक्तिर्यस्यास्तिदेवेशे सर्वैश्वर्ये तथामयि।
गुरौ सर्वात्मभावेन विद्यते भक्तिरुत्तमा॥ १२॥
तस्मैदेयं त्वया शम्भो भावनार्द्रं हृदे गुरौ।
सर्वभूतहितार्थाय शान्ताय सौम्यमूर्तये॥ १३॥
इत्युक्त्वा भावनामूर्तिः सीता जनकनन्दिनी।
कृपापात्राय तस्मै सा पुनः प्रादाद् वरान्तरम्॥ १४॥
सर्वदुःखप्रशमनं जानक्यास्तु प्रसादतः॥ १५॥

❋ सारांश ❋

शिव जी के स्तुति करने पर श्रीसीताजी ने साक्षात् दर्शन देकर शिवजी की इच्छा पूर्ति का बरदान देकर कहा कि तुमने जो चालीस श्लोकों से मेरा परमोत्तम स्तवराज कहा है उसे सदैव सभक्ति स्तवन करने वाला इस लोक के समस्त इच्छित आनन्दों का उपभोग करके मेरे दिव्य साकेत को जावेगा। [इस स्तवराज के चालीस श्लोकोंका ऊपर दिया गया सुललित सवैया छन्दों में अनुवाद किन्हीं श्रीमती "रसराज-लता" जी देवी का है।]

❋ पद ❋

सिया जू के चरन मंगल करन ॥
दीन होइ जो शरण आवत होत तारन तरन।
राम जेहि खल जानि त्यागत ताहु होत सु शरन ॥सिया०॥
अधम काक सुरेश सुत को कोउ न दे पग धरन।
राम के पद मेलि तेहि कहँ होन दीन्ह न मरन ॥सिया०॥
सात सौ निशिचरी लंका बिकट बपु नित धरन।
राखी लीन्हीं पवन सुतसों नीति करि उद्धरन ॥सिया०॥
कहूँ नहिं लखि शरण आयों मातु सिय पग परन।
मिलत "रामकुमार" पद जेहिते मिटति भव जरनि ॥
सिया जू के चरन मंगल करन।

श्रीरामाष्टोत्तरशतनाम स्तोत्रम्।

कैलाशशिखरे रम्ये नानारत्नविभूषिते ।
एकाग्रप्रयतो भूत्वा विष्णुमाराध्यभक्तितः ॥ १ ॥
उपविष्टस्ततो भोक्तुं पार्वतीं शंकरोऽब्रवीत् ।
पार्वत्येहि मया सार्द्धं भोक्तुं भुवनवन्दिते ॥ २ ॥
तामाह पार्वती देवी जप्त्वा नाम सहस्रकम् ।
ततो भोक्ष्याम्यहं देव भुज्यतां भवता प्रभो ॥ ३ ॥
ततस्तां पार्वतीं प्राह प्रहसन् परमेश्वरः ॥ ४ ॥
धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्वति ।
दुर्लभा वैष्णवीभक्तिर्भागधेयं विनेश्वरि ॥ ५ ॥
राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनामता तुल्यं रामनाम वरानने ॥ ६ ॥
रकारदीनि नामानि शृण्वतो मम पार्वति ।
मनः प्रसन्नतां याति रामनामाभिशंकया ॥ ७ ॥
रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि ।
इति राम पदेनासौ परंब्रह्माभिधीयते ॥ ८ ॥
रामेत्युक्ता महादेवि ! भुंक्ष्वसार्द्धं मयाऽधुना ॥९॥
ततो रामेति नामोक्त्वा सह भुंक्तातु पार्वतिः।
पप्रच्छ शंकरं देवं प्रीतिप्रवणमानसा ॥ १० ॥
सहस्रनामभिस्तुल्यं रामनाम त्वयोदितम् ।
तस्यापराणि नामानि सन्ति चेद्रावणद्विषः ॥११॥

कथ्यतां मम देवेश तत्र मे भक्तिरुत्थिता ।
शृणु नामानि वक्ष्यामि रामचन्द्रस्य पार्वति ॥ १२ ॥
नामानि रामचन्द्रस्य सहस्रं तेषु चाधिकम् ।
तेषु चात्यंत मुख्यं हि नाम्नामष्टोत्तरं शतम् ॥ १३॥
विष्णोरेकैक नामैव सर्ववेदाधिकं मतम् ।
तादृङ्नामसहस्रैस्तु रामनामसमं मतम् ॥ १४ ॥
यत्फलं सर्ववेदानां मंत्राणां जपतः प्रिये ।
तत्फलं कोटिगुणितं रामनाम्नैवलभ्यते ॥ १५ ॥
नामानि शृणु रामस्य मुख्यानि शुभदर्शने ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि ते प्रिये ॥१६॥

जब से श्री पार्वती जी ने महर्षि श्री वामदेवजी से भगवन्मंत्र की दीक्षा लिया, तबसे नियमित मंत्र जपके बाद श्री विष्णुसहस्रनाम का पारायण करके तब कुछ खाने पीने का नियम कर लिये थीं। एक बार भगवत्पूजन एवं मंत्र जपके बाद विष्णु सहस्रनाम पारायण करनेके लिये बैठीं ही थीं कि उसी समय शंकर जी ने कहा "पार्वति! आवो मेरे साथ भोजन करो। पार्वती जी ने कहा आप भोजन कीजिये, मैं श्रीविष्णुसहस्रनाम का पारायण करके खाऊँगी। शिव जी ने बहुत प्रशंशा करते हुये कहा कि देवि तुम विष्णुभक्ता होने से धन्य हो विष्णुभक्ति बड़ी दुर्लभ वस्तु है।" परन्तु अब श्रीराम कहकर आजावो। क्योंकि 'एक बार का 'राम' कहना "सहस्रनामता" अनेकों सहस्रनाम पारायण के तुल्य है। कोई

रकारादि शब्द कहने लगता है तो रा उच्चारण करते ही मैं अत्यन्त प्रसन्न होता हूँ कि अब यह 'राम' कहेगा। 'राम' पद से परब्रह्म ही कहा जाता है इसी अनन्त सत्यानन्द चिदात्मा में योगी लोग रमण करते हैं।"

(स्मरण रखना चाहिये कि "श्री विष्णु सहस्रनाम" से परब्रह्म के गौण नामों का स्मरण किया गया है। उसके आरम्भ में ही प्रतिज्ञा है कि 'यानिनामानिगौणानि तानिवक्ष्यामिभूतये। १२' अतः उसमें जो 'रामो विरामो०। ५६' पाठ आया है वह परशुराम और बलराम के लिये है, परब्रह्म-दाशरथीरामके लिये नहीं है। अस्तु)

तब पार्वती जी ने विष्णु सहस्रनाम का पारायण नहीं किया और 'श्रीराम" कहकर शिवजी के साथ भोजन किया। सत्संग गोष्ठी बैठनेपर शिवजीसे प्रश्न किया कि आपने अनेकों विष्णुसहस्रनाम के तुल्य रामनामको कहा। उन रावणारि प्रभु के और नामभी तो हैं, अब कृपा करके उन्हें कहिये। श्रीरामजी के नामों में मेरी भक्ति बढ़ गई है। शिव जी ने कहा कि श्रीरामचन्द्रजी के भी सहस्रनाम हैं। उससे भी अधिक अनगिनत नाम हैं उनमें एकसौ आठ नाम मुख्य हैं। यद्यपि विष्णु के एक एक नाम के उच्चारण का महत्व सम्पूर्ण वेद पाठके फलसे अधिक है। परन्तु एक श्रीरामनाम तो विष्णु के अनेकों सहस्र नामों से भी अधिक माहात्म्य सम्पन्न है। सम्पूर्ण वेद पाठ और वेदोक्त नामोंके जपसे भी करोड़ोंगुणा अधिक फल एक बार

श्रीराम नामके उच्चारणसे प्राप्त होता है। हे शुभदर्शने! देवि! ऋषियों द्वारा जपे जाने वाले श्रीरामचन्द्रजी के एकसौ आठ मुख्य नामों को कहता हूं। समाहित चित्त से सुनो।

ॐअस्य श्री रामचन्द्रस्याष्टोत्तरशतनाम्नामीश्वर ऋषिः, अनुष्टुपछन्दःश्रीरामचंद्रोदेवता श्रीरामप्रीत्यर्थे जपे विनियोगः

१ २ ३ ४
(ॐ) श्रीरामः रामचन्द्रश्च रामभद्रश्च शाश्वतः ।
५ ६ ७ ८
राजीवलोचनः श्रीमान् राजेन्द्रः रघुपुंगवः ॥१॥
९ १० ११ १२
जानकीवल्लभः जैत्रः जितामित्रः जनार्दनः ।
१३ १४ १५
विश्वामित्रप्रियः दान्तः शरणत्राणतत्परः ॥ २ ॥
१६ १७ १८ १९
बालिप्रमथनः बाग्मी सत्यवाक् सत्यविक्रमः ।
२० २१ २२
सत्यव्रतः व्रतधरः सदाहनुमदाश्रितः ॥ ३ ॥
२३ २४ २५
कौशल्येयः खरध्वंसी बिराधबधपण्डितः ।
२६ २७
विभीषणपरित्राता दशग्रीवशिरोहरः ॥ ४ ॥
२८ २९
सप्ततालप्रभेत्ता च हरकोदण्डखण्डनः ।
३० ३१
जामदग्न्यमहादर्पदलनः ताटिकान्तकृत् ॥ ५ ॥
३२ ३३ ३४
वेदान्तपारः वेदात्मा भवरोगस्यभेषजः ।

३५ ३६ ३७
दूषणत्रिशिरोहन्ता त्रिमूर्तिः त्रिगुणात्मकः ॥ ६ ॥
३८ ३९ ४०
त्रिविक्रमः त्रिलोकात्मा पुण्यचारित्र्यकीर्तनः ।
४१ ४२ ४३
त्रिलोकरक्षकः धन्वी दण्डकारण्यवासकृत् ॥७॥
४४ ४५ ४६
अहल्याशापशमनः पितृभक्तः वरप्रदः ।
४७ ४८ ४९ ५०
जितेन्द्रियः जितक्रोधः जितामित्रः जगद्गुरुः ॥८॥
५१ ५२
ऋक्षवानरसंघाती चित्रकूटसमाश्रयः ।
५३ ५४
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ॥ ९ ॥
५५ ५६
सर्वदेवाधिदेवश्च मृतवानरजीवनः ।
५७ ५८ ५९
मायामारीचहंता च महाभोगः महाभुजः ॥ १० ॥
६० ६१ ६२ ६३
सर्वदेवस्तुतः सौम्यः ब्रह्मण्यः मुनिसंस्तुतः
६४ ६५ ६६
महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥ ११ ॥
६७ ६८
सर्वपुण्याधिकफलः स्मृतसर्वाघनाशनः ।
६९ ७० ७१
आदिपुरुषः परमपुरुषः महापुरुष एव च ॥ १२ ॥
७२ ७३ ७४
पुण्योदयः दयासारः पुराणपुरुषोत्तमः ।
७५ ७६ ७७ ७८
स्मितवक्त्रः मिताभाषी पूर्वभाषी च राघवः ॥ १३ ॥

७९ ८०
अनन्तगुणगम्भीरः धीरोदात्तगुणोत्तमः ।
८१ ८२
मायामानुषचारित्रः महादेवादिपूजितः ॥१४॥
८३ ८४ ८५ ८६
सेतुकृत् जितवारीशः सर्वतीर्थमयः हरिः ।
८७ ८८ ८९ ९० ९१
श्यामांगः सुन्दरः शूरः पीतवासा धनुर्धर ॥१५
९२ ९३ ९४
सर्वयज्ञाधिपः यज्वा जरामरणवर्ज्जितः ।
९५ ९६
श्रौतधर्मप्रतिष्ठाता सर्वापगुणवर्ज्जितः ॥ १६ ॥
९७ ९८ ९९
परमात्मा परंब्रह्म सच्चिदानन्दविग्रहः ।
१०० १०१ १०२ १०३
परंज्योतिः परंधाम पराकाशः परात्परः ॥१७॥
१०४ १०५ १०६ १०७ १०८
परेशः पारगः पारः सर्वदेवात्मकः शिवः ॥१८॥

(≍)(≍)(≍)

इति श्रीरामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
गुह्याद्गुह्यतरं देवि तव स्नेहात्प्रकीर्तितम् । १९
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् ।
स्तुवन्तिनामभिर्दिव्यैर्न ते संसारिणो जनाः ॥ २० ॥
रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतयेनमः ॥ २१ ॥
इमं मंत्रं महादेवि जपन्नेव दिवानिशम् ।
सर्व पापविनिर्मुक्तो रामसायुज्यमाप्नुयात् ॥ २२ ॥
इति श्रीरामचन्द्रस्य माहात्म्यं वेद सम्मतम् ।
पद्मपुराणे पातालखण्डे शंकरोदितम् ॥ २३ ॥

—❀—❀—❀—

श्रीजानकीअष्टोत्तर शतनाम स्त्रोत्रम्।

अष्टोत्तरशतं वक्ष्ये नाम्नां परममुत्तमम्।

१ २ ३
सीरध्वजसुता सीता स्वाश्रिताभीष्टदायिनी।
४ ५ ६
सहजानन्दिनी स्तव्या सर्वभूताशयस्थिता ॥ १ ॥
७ ८ ९ १०
ह्लादिनी क्षेमदा क्षान्तिः षडर्धाक्षहृदिस्थिता।
११ १२ १३ १४
श्रीनिधिः श्रीसमाराध्या, श्रियः श्री श्रीमदर्चिता ॥ २ ॥
१५ १६ १७ १८
शरण्या वेदनिः श्वासा वैदेही विबुधेश्वरी
१९ २० २१
लोकोत्तराम्बा लोकादी रघुनन्दनवल्लभा ॥ ३ ॥
२२ २३ २४
रम्यरम्यनिधी रामा योगेश्वरप्रियात्मजा।
२५ २६ २७
यज्ञस्वरूपा यज्ञेशी योगीनाम्परमागतिः ॥ ४ ॥
२८ २९ ३० ३१
मृदुस्वभावा मृदुला मैथिली मधुराकृतिः।
३२ ३३ ३४
मनोरूपा महेशेज्या महासौभाग्यदायिनी ॥ ५ ॥
३५ ३६ ३७
भूमिजा बुधमृग्यांघ्रिकमला बोधवारिधिः।
३८ ३९
फलस्वरूपातपसां फणीन्द्रावर्ण्यवैभवा ॥ ६ ॥
४० ४१ ४२ ४३
नमस्या प्रियदृष्टिश्च धरारत्ना धरासुता।

४४ ४५ ४६ ४७
दिव्यात्मा, दीप्तमहिमा तत्वात्मा जनकात्मजा ॥ ७ ॥
४८ ४९
जगदीशपरप्रेष्ठा ज्ञानिनाम्परमायनम् ।
५० ५१
जगन्मंगलमांगल्या जरामृत्युभयातिगा ॥ ८ ॥
५२ ५३
चन्द्रकलासुखासाध्या चिदानन्दस्वरूपिणी ।
५४ ५५ ५६
चतुरात्मा चतुर्व्यूहा चन्द्रबिम्बोपमानना ॥ ९ ॥
५७ ५८ ५९ ६०
घनश्यामात्मनिलया गोप्त्री गुप्ता गुहेशया ।
६१ ६२
ज्ञेयोदारयशः पंक्तिः, गतैश्वर्यकृतस्मया ॥ १० ॥
६३ ६४
गमनीयपदासक्तिः खलभावनिवारिणी ।
६५ ६६ ६७
कृपापीयूषजलधिः कृतज्ञा कृतिसाधना ॥११॥
६८ ६९ ७० ७१
कल्याणप्रकृतिः काम्या कल्याणी कामवर्षिणी ।
७२ ७३ ७४
कारुण्यार्द्रविशालाक्षी कम्बुकण्ठी कलानिधिः ॥१२॥
७५ ७६ ७७
कोलप्रिया कलाधारा कल्मषौघनिवारणी ।
७८ ७९ ८० ८१
ॐ शब्दवाच्या ह्योजोऽब्धिः उदितश्रीः उदारधी ॥१३॥
८२ ८३ ८४
उदारकीर्तिः उदिता ह्युदारातुल्यदर्शना ।
८५ ८६ ८७ ८८
इष्टप्रदेभगमना आदिजाऽऽ ह्लादिनीपरा ॥१४॥

८९ ९० ९१
आश्रितवत्सला ऽऽराध्या ह्यनिर्देश्यस्वरूपिणी ।
९२ ९३
अद्वितीयसुखाम्भोधिः, अव्याजकरुणाकरा ॥१५॥
९४ ९५ ९६
अनवद्या ऽप्रमत्तात्मा अनन्तैश्वर्यमण्डिता ।
९७ ९८ ९९ १०० १०१
अमाना ऽयोनिजा ऽकोपा अविचिन्त्या ऽनघस्मृतिः॥१६॥
१०२ १०३ १०४ १०५
अनीहा ऽनियमा ऽनादिमध्यान्ता ऽद्भुतदर्शना ।
१०६ १०७ १०८
अजेया ऽकल्मषा ऽकारवाच्येत्यवनिपोत्तम ॥१७॥

अष्टोत्तरशतं नाम प्रोच्यते ऽस्या महर्षिभिः ।
पठतां प्रत्यहं भक्त्या कापि सिद्धिर्न दुर्लभा ॥

इति रामसनेहीदासाभिधे बुधवरे विरचिते श्रीजानकी-चरितामृतेऽष्टाशीतितमेऽध्याये संग्रहीतं श्रीजानक्या अष्टोत्तर शतनाम स्तोत्रं सम्पूर्णम् ॥

❀ श्रीमज्जनकनन्दिन्यै नमः ❀.

श्री श्रीजानकीजी महारानी की जय हो !

श्रीजनकराजकन्ये मातः तुम्हारी जय हो।
त्रैलोकपूज्य धन्ये मातः तुम्हारी जय हो॥
श्रीजनकलली प्यारी निमिवंश की दुलारी।
सब जगसे छटा न्यारी मातः तुम्हारी जय ही ॥श्री०॥
जा बिधि जगत को भल हो जीवन जनम सुफल हो।
कीजै सोई कृपाकरि मातः तुम्हारी जय हो ॥श्रीजन ॥
नहिं और कोऊ मेरे मैं जाऊँ किसके नेरे।
निज चरण में बुलालो मातः तुम्हारी जय हो ॥श्री०॥
कीन्हीं कृपा अहैतुकि दीन्हीं मनुज की देही।
अब चरण शरण दीजै मातः तुम्हारी जय हो ॥श्री०॥
जीवन बचा जो जग में बीते तुम्हारे मग में।
तुव चरण प्रेम रँग में मातः तुम्हारी जय हो ॥श्री०॥
मन पाप से भरा है भवसिन्धु में परा है।
कृपया निकाल दीजै मातः तुम्हारी जय हो ॥श्रीज०॥
हा हम हैं मोह अन्धे करते जगत के धन्धे।
दीजै सुज्ञान दृग अब मातः तुम्हारी जय हो ॥श्री०॥
राघव की कंज दृष्टी में है सुधा की सृष्टी।
करवा दो कृपा वृष्टी मातः तुम्हारी जय हो ॥श्रीज०॥
नीचे हैं दृग हमारे उपकार लखि तुम्हारे।
तौ हू सस्वार्थ बिनवौं मातः तुम्हारी जय हो ॥ श्री० ॥

की मैं न सुत तुम्हारा की तुम न मातु मेरी।
फिर क्यों न गोद लेतीं मातः तुम्हारी जय हो ॥श्री०॥
जस पाप हैं हमारे गनि यम फणीन्द्र हारे।
हौं तुव चरण सहारे मातः तुम्हारी जय हो ॥श्रीजन०॥
यह विनय शुभ तुम्हारी सब जग को मोदकारी।
भक्ती को हौं भिखारी मातः तुम्हारी जय हो ॥ श्री०॥
होते कुपूत कितने माता न हो कुमाता।
लो गोद में 'कुमारहिं' मातः तुम्हारी जय हो ॥श्री०॥
श्रीजनकराज कन्ये मात. तुम्हारी जय हो।
त्रयलोक पूज्य धन्ये मातः तुम्हारी जय हो॥

* पद *

मैया मोहिं एक भरोसो तेरो ॥ टेक ॥
कबहुँ सुकृत कछु कीन्ह न सपनेहुँ पापन ते मन घेरो।
धन जन बल विद्या विवेक नहिं मातु जाउँ केहि खेरो ॥मैया०॥
मात पिता पति तिय सुत भ्राता स्वारथ मीत घनेरो।
तौं बिनु दूसर रक्षक कोऊ जानि परै नहिं मेरो ॥ मैया ॥
तुम्हरी कृपा दरश सपनेहुँ लखि डर न हृदय केहु केरो।
आश त्रास तेहि डर न रहत कछु, जो तुव पद रज चेरो ॥मै०॥
निज 'कुमार' शिशु जानि मोहिंतन कृपादृष्टि करि हेरो।
मातु सीय श्रीराम संग लै करहु हृदय मम डेरो ॥ मैया० ॥
मैया मोहिं एक भरोसो तेरो॥

(≍)(≍)(≍)

लेखक की प्रकाशित कृतियाँ

१—श्रीराम मंत्रार्थ (सार्थ रामतारक प्रयोग विधि) ॥)

२—मानस पारायण पूजन पद्धति (द्वितीयावृत्ति) ।≡)

३—सखी गीता ।)

४—धर्मरथ ॥।)

५—मानस सिद्धान्त प्रथम खंड २॥)

६—वेदों में श्रीराम कथा ४)

७—मंगल पचीसी =)॥

८—सम्बाद बत्तीसी (रम्भाशुक संबाद का सवैयानुवाद) =)॥

उपर्युक्त आठों पुस्तकें मानस संघ, पो० रामवन, जिला सतना (म० प्र०) से प्राप्त होती हैं।

९—दो विभूतियाँ ॥) अप्राप्य

१०-श्रीजानकी चरणचामर की सरल टीका और

११-श्रीजानकी च० चा० की सवैयों में रजप्रच्छालिनी टीका २)

१२-प्रेममयी मुद्रिका ।)

१३-श्रीसीतागुणगान + स्तोत्र पंचक १)

ये पुस्तकें श्री तुलसी साहित्य प्रचारक समिति शृङ्गवेरपुर जि० इलाहाबाद से प्राप्त होती हैं।

शीघ्र प्रकाशित होने वाली पुस्तकें:—

१—मानस शंका समाधान रत्नावली

२—मानस रत्न मंजूषा

३—वेदों में श्रीकृष्ण कथा

४—सत्योपाख्यान का हिन्दी अनुवाद